Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 25

No. of Printed Pages – 07

SS–12–Sanskrit Sah.

# उच्च माध्यमिक परीक्षा, 2017

# SENIOR SECONDARY EXAMINATION, 2017

## संस्कृत साहित्यम्

समय : 3¼ (सपाद होरात्रयम्)

पूर्णाङ्क : 80

परीक्षार्थिभ्य: सामान्य निर्देशा:

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यत: लेख्य: ।

2) सर्वे प्रश्ना: अनिवार्या: ।

3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए



Downloaded from www.cclchapter.com

## खण्ड – क

1) अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

पुत्रः कुपुत्रो भवेत् चेत् तदपि माता कदापि कुमाता न भवति। उक्तश्चापि भगवता शङ्कराचार्येण ''कुपुत्रो जायेत क्वचिदपि कुमाता न भवति''। श्रवणकुमार सदृशः मातापितृभक्त इह लोके न प्राप्यते। सः पितरौ स्कन्धमारोप्य तीर्थाटनं कृतवान् । धिक् तान् पुत्रान् ये मातृणां कष्टमव लोक्य न चिन्तयन्ति। पाण्डवाः स्वमातृभ्यां कुन्तीमाद्रीभ्यां सार्धं वने निवसन्ति स्म। शिवाजी वीरः स्वमातरि महतीं श्रद्धाम् अकरोत्। स प्रतिदिनं स्वमातरं प्रणमति।

i) माता क्वचिदपि का न भवति? (एकपदेन उत्तरम्) [1]

ii) पाण्डवाः काम्यां सार्धं वने निवसन्तिस्म? (पूर्ण वाक्येन उत्तरम्) [1]

iii) ………… स्वमातरि महतीं श्रद्धांम् अकरोत् । इत्यत्र ''अकरोत्'' इति क्रियापदस्य कर्तृ पदं किम्? [1]

2) निम्नलिखितम् अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

ये सत्यं पालयन्ति, ते सर्वोत्तमं धर्मं कुर्वन्ति। ये च सत्यं परित्यज्य असत्यं भजन्ते, ते महापातकं कुर्वन्ति। यतोहि असत्यभाषणेन स्वस्य हानिः नाशश्च भवतः । समाजस्य देशस्य लोकस्य च मिथ्या भाषणेन नाशो भवति। अत एवोच्यते–नहि सत्यात् परोधर्मो नानृतात् पातकं परम्। सत्यस्य पालनार्थमेव महाराजो दशरथः प्रियं पुत्रं रामं वनं प्रेषयत्। राजा हरिश्चन्द्रः सत्यपालनार्थमेव सर्वाणि दुःखानि असहत। युधिष्ठिरः सत्यभाषणस्य प्रभावादेव विजयमलभत। महात्मागाँधिमहोदयः सत्यस्यैव – सदा – शिक्षामदात्। भारतस्य राजचिह्नेऽपि ''सत्यमेव जयते'' इत्यादरेण उल्लिख्यते। अतः सर्वैरपि लौकिकपारलौकिकाभ्युदयाय सत्यमेव सदा भाषणी यम् ।

i) स्वस्य हानिः नाशश्च केन भवतः? (एकपदेन उत्तरम्) [½]

ii) ''सत्यमेव जयते'' इत्यादरेण कुत्र उल्लिख्यते? (एकपदेन उत्तरम्) [½]

iii) मिथ्याभाषणेन कस्य नाशो भवति? (पूर्णवाक्येन उत्तरम्) [2]

iv) ''ते महापातकं कुर्वन्ति'' इत्यस्मिन् वाक्ये ''कुर्वन्ति'' इति क्रियापदस्य कर्तृपदं किम्? [1]

v) सर्वाणि दुःखानि असहत। अस्मिन् वाक्ये सर्वनामपदं किम्? [1]

vi) ''पराजयः'' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत । [1]

vii) ''नहि सत्यात् परोधर्मः''। इत्यत्र विशेष्यपदं किम्? [1]

viii) गद्यांशस्य समुचितं शीर्षकं लिखत । [2]



Downloaded from www.cclchapter.com

## खण्ड – ख

3) प्रदत्तरूपरेखया कथासंयोजनं करणीयम् – [8 × 1 = 8]

................ चम्पकवती नाम अरण्यानी । महता स्नेहेन मृग काकौ .............। सः मृगः .............। जम्बूकः ............आ! ............... कथमेतत् ............ खादिष्यामि?। भवतु ............. विश्वासं .............. उत्पादयामि । अस्मिन् .............. एकाकी निवसामि ।

अथवा

क्रमरहितानि वाक्यानि समुचित क्रमानुसारं लिखत –

i) एकदा कश्चित् प्रमत्तः गजः तस्य वृक्षस्य अश्वः आगतवान् ।

ii) कालेन तस्याः सन्ततिः जाता ।

iii) तस्य शाखां शुण्डेन अत्रोटयत् ।

iv) पुरा एकस्मिन् वृक्षे एका चटका न्यवसत् ।

v) विलापं श्रुत्वा काष्ठकूटः नाम खगः ताम् अपृच्छत् ।

vi) चटकायाः नीडं भुवि अपतत् ।

vii) तेन अण्डानि विशीर्णानि ।

viii) सा चटका व्यलपत्

4) प्रदत्तं संकेतानुसारं वर्णनं लिखत – (80 शब्दाः) [4]

श्रीमद्भगवद्गीता, संस्कृतसाहित्यस्य, रत्नमिव, महाभारतस्य, उपदेशः, श्रुतीनाम्, सारतत्वम्, गौरवम्, भगवता, आत्मा, जायते, म्रियते, निष्कामभावना, कर्म, कृष्णेन, रोचते ।

अथवा

अनेके कवयः, कालिदासः, नाटकानि, महाकाव्ये, गीतिकाव्ये, उपमा, प्रकृतिवर्णनम्, सुमेरूरिव, अभिज्ञानशाकुन्तलम्, संस्कृतसाहित्यागारे, सूक्तिकथनं, छन्दसः, निपुणः, काव्यवैशिष्ट्यम्, उडुपेन, सागरम्।



Downloaded from www.cclchapter.com

## खण्ड – ग

**5)** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

कुटिलेनामुना ''किन्तु''ना कियत्कालात् क्लेशितोऽस्मि। यत्र यत्राहं गच्छामि तत्र तत्रैवास्य शत्रुता सम्मुखस्थिता भवति। अस्य ''किन्तोः'' कारणात् कस्मिन्नपि कार्ये सफलता दुर्घटास्ति। बहून् वारान् दृष्टवातस्मि यत्कार्यं सर्वथा सज्जं सम्पद्यते, सर्वप्रकारैः सिद्धिर्हस्तगता भवति, यथैव सफलताया मूर्तिः सम्मुख मागच्छन्ती विलोक्यते तथैव क्रूरोऽयं किन्तु र्मध्ये प्रविश्य सर्वं विनाशयति ।

i) केन कियत्कालात् क्लेशितोऽस्ति? (एकपदेन उत्तरम्) [1]

ii) मध्ये प्रविश्य कः सर्वं विनाशयति? (पूर्णवाक्येन उत्तरम्) [1]

iii) ............. वारान् दृष्टवानस्मि– । इत्यत्र विशेषणपदेन अन्वितिं कुरूत । [1]

iv) सर्वप्रकारैः सिद्धिर्हस्तगता भवति । इत्यत्र वाक्ये भवति इति क्रियापदस्य कर्तृपदं किम्? [1]

**6)** अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

केयूराणि न भूषयन्ति पुरूषं हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरूषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।

i) पुरूषं का समलङ्करोति? (एकपदेन उत्तरम्) [1]

ii) सततं भुषणं किम्? (पूर्णवाक्येन उत्तरम्) [1]

iii) पद्यांशे ''केशाः'' इत्यस्य पर्यायः कः? [1]

iv) क्षीयन्ते खलु ..........। इत्यत्र ''क्षीयन्ते'' इति क्रियापदस्य कर्तृपदं किम्? [1]

**7)** निम्नाङ्कितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

लव :– ''अश्वोऽश्व'' इति नाम पशु समाम्नाये सांग्रामिके च पठ्यते, तद् ब्रूत – कीदृशः?

वटव :– अये श्रूयताम्
पश्चात्पुच्छं वह ति विपुलं तच्च धूनोत्यजस्रम्,
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति, प्रकिरति शकृत् पिण्डकानाम्रमात्रान्,
किं व्याख्यानैर्व्रजति स पुनर्दूर मेह्येहि यामः ।।
(इत्यजिने हस्तयोश्चाकर्षन्ति)

लवः (सकौतुकोपरोध विनयम्।) आर्याः ! पश्यत ।
एभिर्नीतोऽस्मि । (इति त्वरितं परिक्रामति)



Downloaded from www.cclchapter.com

i) पश्चात् किं वह ति? (एकपदेन उत्तरम्) [1]

ii) "अश्वोऽश्वः" इति नाम कस्मिन् पठ्यते? (पूर्णवाक्येन उत्तरम्) [1]

iii) "खुराः तस्य चत्वारः"। इत्यत्र विशेष्यपदं किम् ! [1]

iv) अस्मिन् नाट्यांशे "निरन्तरम्" इति पदस्य पर्यायः कः? [1]

**8)** निम्नलिखित शब्दयोः हिन्दी भाषायाम् आङ्लभाषायां वा अर्थं लिखत – [1+1=2]

i) खलीकरोति

ii) कलापी

**9)** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरूत – [1+1+1+1=4]

i) विद्ययाऽमृतमश्नुते

ii) मनसि उपदेशगुणाः प्रविशन्ति

iii) पृथिव्याः सप्त भेदाः ।

iv) पत्रमादाय तोरणदुर्गं प्रयाति ।

**10)** निम्नाङ्कित वाक्ययो : भावार्थः हिन्दीभाषायां संस्कृते आङ्लभाषायां वा लेखनीयः [2+2=4]

i) नृपोऽर्थिकामादश्विक प्रदश्च ।

ii) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।

**11)** अधोलिखितस्य श्लोकस्य अन्वयं लिखत – [2]

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ।।

**12)** निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

i) श्रीदासः तत्पत्रमुद्घाटितवान् ।
इत्यस्मिन् कर्तृक्रिययोः चयनं कुरूत । [1+1=2]

ii) गौरो युवा हयेन पर्वतश्रेणीरूपर्युपरि गच्छति ।
इत्यत्र विशेषण पदं किम्? [1]



Downloaded from www.cclchapter.com

iii) <u>तेन</u> प्रेषितोऽहं त्वामा ह्वातुं समागतः

इत्यत्र रेखाङ्कितपदस्य स्थाने संज्ञा पदस्य प्रयोगं कृत्वा वाक्यं पुनः लिखत – [1]

iv) एषः सुगठितदृढशरीरः । इत्यत्र सर्वनाम पदस्य चयनं कुरूत – । [1]

v) रमते न <u>मरालस्य</u> मानसं मानसं विना । इत्यत्र रेखाङ्कितपदस्य पर्यायबोधकंपदं लिखत – [1]

vi) <u>अमङ्गलमिव</u> उपघ्नन्ति विश्वासम् । इत्यत्र रेखाङ्कितपदस्य विलोमार्थकपदं लिखत – [1]

vii) ''अधुना मम गमनसमयः समुपागत एव'' । इत्येतत्वाक्यं कः कस्मै कथयति ? [1]

13) प्रतिज्ञायौगन्धरायणस्य लेखकः कः ? [1]

14) महाकविता कालिदासेन कतिः नाटकानि रचितानि ? [1]

15) ''लेलिनामृतम्'' इति महाकाव्यस्य रचनाकारः कः ? [1]

16) उत्तररामचरिते कतिः अङ्काः सन्ति ? [1]

17) देवर्षि कलानाथ शास्त्री कस्य पुत्रः ? [2]

18) ''प्रतिवेशिनी'' कथायाः रचयिता कः ? [1]

19) ''जयपुरविलासः'' इति केन कविना सुरचितं खण्डकाव्यम् ? [1]

20) i) ''भवति'' इत्यत्र कः गणः ? [1]

ii) प्रतिचरणे द्वादशवर्णाः कस्मिन् छन्दसि भवन्ति ? [1]



Downloaded from www.cclchapter.com

21) अधोलिखितेषु कथोश्चिद् द्वयो: लक्षणोदाहरणे लिखत – [1½+1½=3]

i) उपेन्द्रवज्रा

ii) वसन्ततिलका

iii) मालिनी

22) निम्नलिखित पंक्तिषु छन्दस: नामोल्लेखं कुरुत – [1+1+1=3]

i) हंसो यथा राजतपञ्जरस्थ: ।

ii) सा वाणी विनय: स एव सहज: पुण्यानुभावोऽप्यसौ ।

iii) मनो मे संमोह स्थिरमपि हरत्येष बलवान् ।

23) उपमानोपमेययो: अभेदकथने कोऽलंकार: भवति ? तस्य – परिभाषा लेखनीया । [2]

24) अधोलिखितयो: कथोश्चित् द्वयो: अलंकारयो: लक्षणोदाहरणे लिखत – [1½+1½=3]

i) अनुप्रास:

ii) उपमा

iii) व्याजस्तुति:

25) अधोलिखितेषु पंक्तिषु अलंकारस्य नामोल्लेखं कुरुत –

i) उच्छलद् भूरि की लाल: शुशुभे वाहिनीपति:। [1]

ii) यूथेऽपयोत हस्तिग्रहणोद्यतेन केन कलत्तो गृहीत: । [1]

iii) य: स्वभावो हि यस्यास्ति स नित्यं दुरति क्रम: ।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम् ।। [1]



Downloaded from www.cclchapter.com

DO NOT WRITE ANYTHING HERE

Downloaded from www.cclchapter.com